
Cover Page

DOI: http://ijmer.in.doi./2023/12.05.20
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

# विवाहसंस्कारे पञ्चाङ्गशुद्धिः मासशुद्धिश्च

**Dr. V. Dharmadasan**
**Assistant Professor**
**Dept. of Jyotisha&Vastu**
**National Sanskrit University, Tirupati**

**सारांशः** - वेदाङ्गष्वन्यतममङ्गं भवति ज्योतिषशास्त्रम् । मानवजीवनं यथा सुखमयं भवेत् तथा ज्योतिषशास्त्रम् मार्गदर्शनं करोति । मनुष्यस्य जन्मकालाद् मृत्युकालपर्यन्तं संभाव्यघटनानां विषये बोधयति ज्योतिषशास्त्रम् । कालविधानशास्त्रं ज्योतिषशास्त्रम् इत्युक्ते शुभाशुभकालविषये शास्त्रेऽस्मिन् चिन्तनं क्रियते । मानवजीवने संस्काराणां किञ्च तेषां मुहूर्तानां विशेष महत्वं दत्तमस्ति । षोडशसंस्कारेषु अन्यतमः संस्कारः भवति विवाहसंस्कारः एतस्य मुहूर्तविषये ज्योतिषशास्त्रे विस्तृत रूपेण विचारः कृतः अस्ति । प्रस्तुत शोधपत्रे विवाहसंस्कारे पञ्चाङ्गशुद्धिः मासशुद्धिश्च इत्यस्मिन् विषये विचारः प्रतिपादित: अस्ति ।

**प्रस्तावना** - विवाहो नाम पाणिग्रहणाख्य संस्कारविशेषो भवति। सन्तानप्राप्तये वंशपिरपालनाय च कुलमहिमायुक्तं, शीलान्वितं रूपी स्वानुरूपं सुलक्षणायुक्तां कन्यां विधिवत् स्वीक्रियमाणं विधिविधानं भवति विवाहः। विवाहसंस्कारमुहूर्ते पञ्चाङ्गानां तिथिवारनक्षत्रयोगकरणानांशुद्धिः सर्वोत्कर्षेण वर्तते। अतः विशिष्टानां मुहूर्तग्रन्थकाराणाम् आचार्याणां मतावलम्बितं विवाहसंस्कारोदितं पञ्चाङ्गशुद्धिं मासशुद्धिं च निरूप्यते ।

**विवाहे नाक्षत्रतिथिवारादिविचारः-**

विवाहसंस्कारः रोहिणी, स्वाती, रेवती, मृगशिरा, मूलं, मघा, हस्तः, अनुराधा, उत्तराफाल्गुनी, उत्तराषाढा, उत्तराभाद्रपदानक्षत्रेषु श्रेष्ठो भवति। केचित् मघामूले मध्यमौ इति । तथा स्त्रियः जन्मानुजन्मनक्षत्राणि विवाहे शुभानि इति माधवीये उक्तम् ।

षष्ठी, अमावासी, अष्टमी, कृष्णपक्षान्त्यपञ्चतिथयः शुक्लपक्षप्रतिपत् रिक्ताश्च तिथयः विवाहे अशुभाः भवन्ति। उक्तेतराः शुभाः च। तथा विवाहे सौम्यवाराः शुभाः रविशनी मध्यमौ, मङ्गलः अधमश्च भवति।रोहिणी,

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

Cover Page

DOI: http://ijmer.in.doi./2023/12.05.20
www.ijmer.in

उत्तरात्रयं, मूलं, मघा, अनुराधा, रेवती, मृगशिरा, हस्तः, स्वाती एते एकादशताराः विवाहे शुभाः भवन्ति इति। तथा पूर्वाफाल्गुनी नक्षत्रे सीतायाः विवाहः जातः तेन शुभं न प्राप्तम् इत्यतः पूर्वाफाल्गुनी विवाहे अशान्तिप्रदो भवतीत्यपि मुहूर्तगणिपतिकारेण उक्तम्। तद्यथा-

**षष्ठी दर्शोऽष्टमी रिक्ता कृष्णपक्षान्त्यपञ्जके।**
**शुक्ला च प्रतिपन्नेष्टास्थितयोऽन्ये च शोभनाः।।**
**सौम्यवाराः शुभा मध्यौ सूर्यमन्दौ कुजोऽधमः।**
**रोहिण्यामुत्तरं मूले पितृमैत्रान्तिमे मृगे।।**
**हस्ते स्वात्यां मृगाक्षीणां शोभनं करपीडनम्।**
**सीतोढा पूर्वफाल्गुन्यां नो लेभे शमतो न सत्।।**[1]


निर्वेधः, मृगशिरा, हस्तः, मूलम्, अनुराधा, मघा, रोहिणी, उत्तरात्रयं, स्वाती एतेषु नक्षत्रेषु, रिक्ता तिथिः तथा अमावास्यारहित शुभग्रहवासरे विवाहः शुभो भवति इति मुहूर्त्तचिन्तामणिकारः यथा –

**निर्वेधैः शशिकरमूलमैत्र्यापित्र्य**
**ब्राह्मान्त्योत्तरपवनैः शुभो विवाहः।**
**रिक्ताऽमारहिततिथौ शुभेऽह्नि वैश्व**
**प्रान्त्याङ्घ्रि श्रुतितिथिभागतोऽभिजित्स्यात्।।**[2]

मूलं, रेवती, हस्तः, मघा, रोहिणी, उत्तरात्रयं, मृगशिरा, स्वातीभिः सहितं अनुराधानक्षत्रं विवाहे शुभं भवति। अन्यान्यनुक्तानि नक्षत्राणि अशुभानि इत्यर्थः। यन्नक्षत्रं केनचित् पापग्रहेण भुक्तं तत् यावच्चन्द्रेण न भुक्तं तावदसत् भवति। केनचित् पापग्रहेण युक्तं नक्षत्रमपि असत् भवति। पापग्रहेण भोक्तुं नक्षत्रं तथा ग्रहेण वेधितं यन्नक्षत्रं तदपिविवाहे असत् भवति। उत्तराषाढमृगशिरयोः, भरण्यनुराधयोः, रोहिण्यभिजित् तयोः, मघाश्रवणयोः, रेवत्युत्तराफाल्गुन्योः, पुनर्वसुमूलयोः, शतभिषक्स्वात्योः, उत्तराभाद्रहस्तयोश्च मिथः परस्परं वेधः स्यात् इति। तदुक्तं मुहूर्त्तमार्तण्डकारेण यथा -

---

[1] मु.ग –15. 128-130
[2] मु.चि - 6. 55


Cover Page

DOI: http://ijmer.in.doi./2023/12.05.20
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

**मूलान्त्यर्कमघास्थिरेन्द्रनिलयुङ्मैत्रं विवाहे शुभं**

**पापत्यक्तमनिन्दुभुक्खलयुतं भोग्यं च विद्धं न सत्।**

**विश्वेन्द्वोर्यममित्रयोद्विकभयोःपैत्र्यर्क्षहर्योर्मिथो-**

**ऽन्यार्यम्णोः पुनरस्रपोर्वरुणभस्वात्योरुभाहस्तयोः।।**[3]

मुहर्तकल्पद्रुमकारः नक्षत्रेषु स्वाती, अनुराधा, रोहिणी, उत्तरात्रयं, मूलं, मघा, हस्तः, मृगशिरा, रेवती इत्येतानि नक्षत्राणि विवाहे शुभानि इति अवदत्। यदि नक्षत्रे शुभग्रहस्य वेधः चेत् तत्र विद्धचरणं तथा पापग्रहस्य वेधश्चेत् सम्पूर्णनक्षत्रं च त्यजेत् इति। तद्यथा-

**वातानुराधाध्रुवमूलपित्र्यकरेन्दुपौष्णैः शुभदो विवाह।**

**विद्धे शुभैर्भे चरणं त्यजेच्च खलग्रहैविद्धमशेषमुज्झेत्।।**[4]

पूर्वकालमृतकरः विवाहे चान्द्रमासस्य कृष्णपक्ष एकादशीतः पञ्चतिथयः, मातापितरौ श्राद्धतिथी, रिक्ताः, अष्टमी, द्वादशी, षष्ठी, विष्टिः, दिनस्य उत्तरभागः, शुक्लपक्ष प्रतिपत्, तिथिक्षयः, अर्धरात्रिः,प्रदोषतिथिः (७,१३) मन्वादि वा युगादि तिथयः निन्दिताः भवन्ति इति । तद्यथा-

**मासान्ते दिनपञ्चके पितृतिथौ रिक्ताष्टमी द्वादशी**

**षष्ठी विष्टिषु वा दिनोत्तरदले सायंतनेऽहर्मुखे।**

**मासादाववमार्धरात्रदिनकृत् कामप्रदोषेषु वा**

**मन्वादौ च युगादि वर्ज दिवसे पाणिग्रहो निन्दितः।।**[5]

एवं पाणिग्रहणे बुधगुरुशुक्राः वासराः शुभाः तथा रविमन्दौ वासरौ मध्यमौ। मङ्गलवासरे विवाहः निधनदः भवति। सोमवासरे विवाहः पुनर्विवाहभयो भवति। रेवती, उत्तरात्रयं, हस्तः, रोहिणी, मघा, स्वाती, मृगशिरा, अनुराधा, मूलम् इत्येतेषु नक्षत्रेषु विवाहो शुभो भवति। किन्तु विवाहयोग्यनक्षत्रे पापग्रहयोगो पापवेधो वा भवेत् तर्हि तत् नक्षत्रं त्याज्यं भवति। तद्यथा पूर्वकालामृते –

---

[3]मु.मा - 4. 14
[4]मु.क - 13. 37
[5]पू.का - 3. 8

Cover Page
INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
DOI: http://ijmer.in.doi./2023/12.05.20
www.ijmer.in

**शुक्रार्येन्दुजवासरेषु शुभदो मन्दार्कयोर्मध्यम:**

**चोद्वाह: कुजवासरे निधनद: सोमे सपत्नीप्रद:।**

**रेवत्युत्तररोहिणी करपितृस्वातीन्दु मित्रासुरे**

**पापानन्वितपापवेधरहिते पाणिग्रह: शोभन:।।**[6]

चान्द्रमासान्तपञ्चदिनानि, रिक्ताः, अष्टमी, षष्ठी तिथयः, परिघयोगस्य पूर्वार्धं, वैधृतिः तथा व्यतीपातयोगौ च त्यजेत्। तथा पूर्वोक्तवत् वेधरहित एकादशनक्षत्राणि विवाहे ग्राह्याणि भवन्ति। तद्यथा नारदसंहितायाम् -

**मासान्ते पञ्चदिवसांस्त्यजेद्रिक्तां तथाष्टमीम्।**

**षष्ठी च परिघाद्यर्द्धं व्यतीपातं सवैधृतिम्।।**

**पौष्णधात्र्युत्तरामैत्रमरुच्चन्द्रार्क पैतृभम्।**

**समूलभैरविद्धैव स्त्री करग्रह इष्यते।।**[7]

विवाहसंस्कारः "**इष्टा:कृष्णाष्टमीनेन्द्वजपितृमरुदन्त्योत्तरामूलमित्रा**"[8] इतिमुहूर्त्तपदवीकारः अपि।

**<u>विवाहे मासविचार:</u>**

माघफाल्गुनवैशाखज्येष्टमासेषु विवाहः शुभप्रदः। कार्तिकमार्गशीर्षायोः मध्यमः, व्या अन्येषु मासेषु अधमः च भवति। तद्यथा नारदमुनिः-

**माघफाल्गुनवैशाखज्येष्ठमासा: शुभप्रदा:।**

**मध्यम: कार्तिको मार्गशीर्षो वै निन्दिता: परे।।**[9]

विवाहे शुभमासाः यथा रविः मेघवृश्चिकमकरमिथुनवृषभराशिषु स्थितश्चेत् विवाहः गुमी भवति तथा मिथुनस्थ: रविः विष्णुशयनात् पूर्वे शुभो भवति। एवंवैशाखकालान-माघ-ज्येष्टमासाः विवाहे उत्तमाः तथा मार्गशीर्षो मध्यमः, अवशिष्टाः मासाःअशुभाः च भवन्ति।

---

[6] पू.का - 3. 9
[7]ना.सं - 29. 11,12
[8]मु.प - पृ. 52
[9]ना.सं - 29. 2

Cover Page

DOI: http://ijmer.in.doi./2023/12.05.20
www.ijmer.in

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf

यदि रविः वृश्चिकमकरमेषेषु स्थितश्चेत् क्रमशः कार्तिकपौषचैत्रेषु विवाहः शस्तो भवति। यदि धनुस्थः सूर्यश्चेत् मार्गशीर्षे तथा मीनस्थः रविश्चेत् फाल्गुनमासे च विवाहो अशुभो भवति। किमर्थं चेत् मौञ्जीबन्धनविवाहादिशुभकर्मेषु सर्वत्र सौरमासाः एव स्वीकुर्वन्ति इत्यतः। तद्यथामुहूर्तगणपतौ-

**मेषवृश्चिककुम्भेषु मकरे मिथुने वृषे।**
**रवौ पाणिग्रहः श्रेष्ठो युग्मे विष्णुशयावधि।।**
**वैशाखः फाल्गुनो माघो ज्येष्ठश्चैते शुभप्रदाः।**
**मास उद्वहने मार्गो मध्योऽन्ये त्वशुभा मताः।।**
**वृश्चिके मकरे मेषे विद्यमाने दिवाकरे।**
**कार्तिकः पौषचैत्रो च विवाहे तेऽपि शोभनाः।।**
**मार्गशीर्षे धनुष्यर्के मीनार्कः फाल्गुनेऽशुभः।**
**सौरो व्रतविवाहादौ मासः सर्वत्र शस्यते।।**[10]

**निष्कर्षः-**

अनेन मुहूर्तकाराणां मतादिकमवलोकनेन इदं स्पष्टं भवति यत् विवाहः रोहिणी, स्वाती मृगशिरा, मूलं, मघा, हस्तः, उत्तरात्रयम्, अनुराधादिषु नक्षत्रषु शुभो भवति। जन्मनक्षत्रं, ग्रहवेधनक्षत्रं, पापग्रहयुतनक्षत्रं च विवाहे वर्ज्यानि भवन्ति। तथा सौम्यवाराः विवाहे शुभाः, रविमन्दौ मध्यमौ, कुजवारः अधमश्च। केचित् चन्द्रवारे विवाहः सपत्नीप्रदः इति। तथा विवाहे रिक्ताः तिथयः, चान्द्रमासान्तपञ्चदिनानि,चन्द्रमासाद्यदिनं, क्षयतिथिः, षष्ठी, अष्टमी तिथि, विष्टिकरणं, व्यतीपातवैधृतीयोगौपरिघयोगस्य पूर्वार्धं च त्याज्यानि भवन्ति इति। एवं विवाहसंस्कारः मेषवृश्चिकमकरमिथुनवृषभेषु सौरमासेषु वा वैशाख-माघ-फाल्गुन-ज्येष्ठ-मार्गशीर्षेषु चान्द्रमासेषु शुभा भवति इति विविधैः आचार्यैः विविधा न्यगादि। इत्थं विवाहे पञ्चाङ्गशुद्धि-मासशुद्धिविचारः ।

[10] मु.ग - 15. 123-126

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881; IMPACT FACTOR :8.017(2023); IC VALUE:5.16; ISI VALUE:2.286
Peer Reviewed and Refereed Journal: VOLUME:12, ISSUE:5(1), May: 2023
Online Copy of Article Publication Available (2023 Issues)
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: 2nd May 2023
Publication Date:1st June 2023
Publisher: Sucharitha Publication, India
Digital Certificate of Publication: www.ijmer.in/pdf/e-CertificateofPublication-IJMER.pdf
Cover Page
DOI: http://ijmer.in.doi./2023/12.05.20
www.ijmer.in

| | विहितनक्षत्राणि | ग्राह्यतिथयः | ग्राह्यवाराः | ग्राह्यमासाः |
|---|---|---|---|---|
| विद्या-माधवीयम् | रोहिणी, स्वाती, रेवती, मृगशिरा, मूल, मघा, हस्तः, अनुराधा, उत्तरात्रयम् | | | |
| मुहूर्त-गणपतिः | रोहिणी, स्वाती, रेवती, मृगशिरा, मूलम्, मघा, हस्तः, अनुराधा, उत्तरात्रयम् | कृष्णप्रतिपत्, द्वितीया, तृतीया, पञ्चमी, सप्तमी,दशमी, एकादशी, द्वादशी, त्रयोदशी | बुधः , गुरुः, शुक्रः च शुभाः ,रवि-शनीमध्यमौ | मेषः, वृश्चिकः, मकरः, मिथुनम्, वृषभः |
| मुहूर्त-चिन्तामणिः | रोहिणी, स्वाती, मृगशिरा, मूलम्, मघा, हस्तः, अनुराधा, उत्तरात्रयम् | प्रतिपत्, द्वितीया, तृतीया, पञ्चमी, , षष्ठी, सप्तमी, अष्टमी, दशमी,एकादशी, द्वादशी, त्रयोदशी, पूर्णिमा | बुधः , गुरुः, शुक्रः चन्द्रः च शुभाः | |
| मुहूर्त-मार्तण्डः | रोहिणी, स्वाती, मृगशिरा, मूलम्, मघा, हस्तः, अनुराधा, उत्तरात्रयम्, रेवती | | | |
| मुहूर्त-कल्पद्रुमः | रोहिणी, स्वाती, मृगशिरा, मूलम्, मघा, हस्तः, अनुराधा, उत्तरात्रयम् | | | |
| पूर्व-कालामृतम् | रोहिणी, स्वाती, मृगशिरा, मूलम्, मघा, हस्तः, अनुराधा, उत्तरात्रयम् | प्रतिपत्, द्वितीया, तृतीया, पञ्चमी, सप्तमी, दशमी, एकादशी, त्रयोदशी, पूर्णिमा | बुधः , गुरुः, शुक्रः च शुभाः , रवि-शनीमध्यमौ | |
| नारदसंहिता | रोहिणी, स्वाती, मृगशिरा, मूलम्, मघा, हस्तः, अनुराधा, उत्तरात्रयम् | प्रतिपत्, द्वितीया, तृतीया, पञ्चमी, सप्तमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, पूर्णिमा | | माघ-फाल्गुन-वैशाख-जयेष्ठमासाः शुभाः कार्तिकमार्गशीर्षौ मध्यमौ |

**संदर्भग्रन्थसूची**

1-मु.ग – मुहूर्तगणपतिः- श्रीमद् दैवज्ञरावलहरिशङ्करसूरिसूनुगणपतिकृत – डा. मुरलीधरचतुर्वेदी – मोत्तिलाल् बनारसीदास, वाराणसी

2- मु.चि –मुहूर्तचिन्तामणिः -श्रीरामदैवज्ञविरचितः – रामचन्द्रपाठक् - चौखम्ब संस्कृत संस्थान् , वाराणसी

3- मु.मा – मुहूर्तमार्तण्डः - श्रीनारायणदैवज्ञविरचितः – मैथिलीपण्डितः, श्रीकपिलेश्वरशास्त्रि – चौखम्ब संस्कृत संस्थान्, वाराणसी

4- मु.क – मुहूर्तकल्पद्रुमः- श्रीमद् विदुलदीक्षितविरचितः – डा. सुरेश्चन्द्रमिश्रः – रञ्जन् प्रकाशन् ,16 अन्सारी रोट् , दरियागञ्ज्, नवदिल्ली

5- पू.का – पूर्वकालामृतम् - कवि कालिदासः - डा. सुरेश्चन्द्रमिश्रः – रञ्जन् प्रकाशन् ,16 अन्सारी रोट् , दरियागञ्ज्, नवदिल्ली

6- ना.सं – नारदसंहिता - नारदमहामुनिप्रणीतः – आचार्य रामजन्ममिश्रः - चौखम्बासंस्कृतभवन् , वाराणसी

7- मु.प – मुहूर्तपदवी (सर्वार्थबोधिनी व्याख्या) पुलियूर् पि. एस्. पुरुषोत्तमन् पोट्टि